श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ द्विषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विषष्टितमः सर्गः ॥

## कुम्भकर्णस्य रावणगृहे प्रवेशो रामाद् भयं सूचयित्वा रावणेन तस्य शत्रुसेनासंहरणाय प्रेषणम्

स तु राक्षसशार्दूलो निद्रामदसमाकुलः।
राजमार्गं श्रिया जुष्टं ययौ विपुलविक्रमः॥ **6.62.1** ॥

राक्षसानां सहस्रैश्च वृतः परमदुर्जयः।
गृहेभ्यः पुष्पवर्षेण कीर्यमाणस्तदा ययौ॥ **6.62.2** ॥

स हेमजालविततं भानुभास्वरदर्शनम्।
ददर्श विपुलं रम्यं राक्षसेन्द्रनिवेशनम्॥ **6.62.3** ॥

स तत्तदा सूर्य इवाभ्रजालं
    प्रविश्य रक्षोधिपतेर्निवेशम्।
ददर्श दूरेऽग्रजमासनस्थं
    स्वयम्भुवं शक्र इवासनस्थम्॥ **6.62.4** ॥

भ्रातुः स भवनं गच्छन् रक्षोगणसमन्वितः।
कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम्॥ **6.62.5** ॥

सोऽभिगम्य गृहं भ्रातुः कक्ष्यामभिविगाह्य च।
ददर्शोद्विग्नमासीनं विमाने पुष्पके गुरुम्॥ **6.62.6** ॥

अथ दृष्ट्वा दशग्रीवः कुम्भकर्णमुपस्थितम्।
तूर्णमुत्थाय संहृष्टः सन्निकर्षमुपानयत्॥ **6.62.7**॥

अथासीनस्य पर्यङ्के कुम्भकर्णो महाबलः।
भ्रातुर्ववन्दे चरणौ किं कृत्यमिति चाब्रवीत्॥ **6.62.8**॥

उत्पत्य चैनं मुदितो रावणः परिषस्वजे।
स भ्रात्रा सम्परिष्वक्तो यथावच्चाभिनन्दितः॥ **6.62.9**॥

कुम्भकर्णः शुभं दिव्यं प्रतिपेदे वरासनम्।
स तदासनमाश्रित्य कुम्भकर्णो महाबलः॥ **6.62.10**॥

संरक्तनयनः क्रोधाद् रावणं वाक्यमब्रवीत्।
किमर्थमहमादृत्य त्वया राजन् प्रबोधितः॥ **6.62.11**॥

शंस कस्माद् भयं तेऽत्र को वा प्रेतो भविष्यति।
भ्रातरं रावणः क्रुद्धं कुम्भकर्णमवस्थितम्॥ **6.62.12**॥

रोषेण परिवृत्ताभ्यां नेत्राभ्यां वाक्यमब्रवीत्।
अद्य ते सुमहान् कालः शयानस्य महाबल॥ **6.62.13**॥

सुषुप्तस्त्वं न जानीषे मम रामकृतं भयम्।
एष दाशरथिः श्रीमान् सुग्रीवसहितो बली॥ **6.62.14**॥

समुद्रं लङ्घयित्वा तु मूलं नः परिकृन्तति।
हन्त पश्यस्व लङ्कायां वनान्युपवनानि च॥ **6.62.15**॥

सेतुना सुखमागत्य वानरैकार्णवं कृतम्।
ये राक्षसा मुख्यतमा हतास्ते वानरैर्युधि॥ **6.62.16**॥

वानराणां क्षयं युद्धे न पश्यामि कथञ्चन।
न चापि वानरा युद्धे जितपूर्वाः कदाचन॥ **6.62.17**॥

तदेतद् भयमुत्पन्नं त्रायस्वेह महाबल।
नाशय त्वमिमानद्य तदर्थं बोधितो भवान्॥ **6.62.18** ॥

सर्वक्षपितकोशं च स त्वमभ्युपपद्य माम्।
त्रायस्वेमां पुरीं लङ्कां बालवृद्धावशेषिताम्॥ **6.62.19** ॥

भ्रातुरर्थे महाबाहो कुरु कर्म सुदुष्करम्।
मयैवं नोक्तपूर्वो हि भ्राता कश्चित् परन्तप॥ **6.62.20** ॥

त्वय्यस्ति मम च स्नेहः परा सम्भावना च मे।
देवासुरेषु युद्धेषु बहुशो राक्षसर्षभ॥ **6.62.21** ॥

त्वया देवाः प्रतिव्यूह्य निर्जिताश्चासुरा युधि॥ **6.62.22** ॥

तदेतत् सर्वमातिष्ठ वीर्यं भीमपराक्रम।
नहि ते सर्वभूतेषु दृश्यते सदृशो बली॥ **6.62.23** ॥

कुरुष्व मे प्रियहितमेतदुत्तमं
    यथाप्रियं प्रियरण बान्धवप्रिय।
स्वतेजसा व्यथय सपत्नवाहिनीं
    शरद्घनं पवन इवोद्यतो महान्॥ **6.62.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विषष्टितमः सर्गः॥